## धुरो यड्ढकौ । (७६/१६२८)

[1]तद् वहति इत्येव । [2]धुर् इत्येतस्माद् द्वितीयासमर्थाद् वहति इत्येतस्मिन्नर्थे यत् ढक् इत्येतौ प्रत्ययौ भवतः । धुरं वहति धुर्यः, धौरेयः ॥

## खः सर्वधुरात् । (७८/१६३०)

तद्वहति इत्येव । [3]सर्वधुराशब्दाद् द्वितीयासमर्थात् वहति इत्येतस्मिन्नर्थे खः प्रत्ययो भवति । [4]सर्वधुरां वहति सर्वधुरीणः । [5]स्त्रीलिङ्गे न्याय्ये सर्वधुरात् इति [6]प्रातिपदिकमात्रापेक्षो निर्देशः । खः इति योगविभागः [7]कर्तव्यः इष्टसङ्ग्रहार्थः । उत्तरधुरीणः । दक्षिणधुरीणः ॥

## एकधुराल्लुक् च । (७९/१६३१)

तद् वहति इत्येव । [8]एकधुराशब्दाद् द्वितीयासमर्थाद् वहति इत्येतस्मिन्नर्थे खः प्रत्ययो भवति, तस्य च लुग् भवति । वचनसामर्थ्यात् पक्षे लुग् [9]विधीयते । [10]एकधुरां वहति एकधुरीणः, एकधुरः ॥

## शकटादण् । (८०/१६३२)

तद्वहति इत्येव । शकटशब्दाद् द्वितीयासमर्थाद् वहति इत्येतस्मिन्नर्थे अण् प्रत्ययो भवति । शकटं वहति शाकटो गौः[11] ॥

## हलसीराट् ठक् । (८१/१६३३)

तद्वहति इत्येव । हलसीरशब्दाभ्यां द्वितीयासमर्थाभ्यां वहति इत्येतस्मिन्नर्थे ठक् प्रत्ययो भवति । हलं वहति हालिकः । सैरिकः ॥

## सञ्ज्ञायां जन्याः । (८२/१६३४)

तद् वहति इत्येव । जनीशब्दाद् द्वितीयासमर्थाद् वहति इत्येतस्मिन्नर्थे यत् प्रत्ययो भवति, समुदायेन चेत् सञ्ज्ञा गम्यते । जनीं वहति जन्या, जामातुर्वयस्या । [12]सा हि विहारादिषु जामातृसमीपं प्रापयति । जनी[13] वधूरुच्यते ॥

---

1. तदिति द्वितीयासमर्थात् धुर्शब्दात् ज. 2. धुरशब्दात् फ. 3. सर्वधुरशब्दात् ड. ज. 4. सर्वधुरां वहति नास्ति ड. 5. स्त्रीलिङ्गनिर्देशो न्याय्यः ड. 6. प्रातिपदिकापेक्षो ड. इ. 7. इष्टः संग्रहार्थः क. 8. एकधुरशब्दात् ड. 9. विज्ञायते ब. ह. ज. 10. एकां धुरं वहति ड. इ. ज. 11. द्वैशकटः इत्यधिकम् फ. 12. सा हि–प्रापयति नास्ति ब. क. ड. इ. ह. ज. 13. इति इत्यधिकम् फ.